पृष्ट (१)

श्री गणेशायनमः ॥ अथमान वगृह्यानु सारेण वैश्वदेव प्रयोगेण लिख्यते ॥
आचम्य प्राणानायम्य ॥ देश कालौ संकिर्त्य मम अन्नसंस्कारद्वारा
आत्म संस्कारार्थं पंचसूनाजनित प्रत्यवाय दोषपरिहारार्थं श्रीपरमेश्वर
प्रीत्यर्थं सायं प्रातर्वैश्वदेवाख्यं कर्म करिष्ये ॥ चत्वारी श्रृंगा गौतमो
वामदेवोग्निस्त्रिष्टुप् अग्निमूर्तिध्याने विनीयोगः ॥ चत्वारि शृंगा त्रयो
अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य ॥ त्रेधा बद्धो वृषभो रोरवीति
महोदेवो मर्त्याँ आततान ॥ स्मृतिमंत्रश्च सप्तहस्तश्चतुशृंगः सप्तजिह्वो
द्विशीर्षकः ॥ त्रिपात्प्रसन्नवदनः सुखासीनः शुचिस्मितः ॥१॥

(२)

स्वाहांतु दक्षिणे पार्श्वे देवीं वामे स्वधांतथा ॥ बिभ्रद्दक्षिण हस्तैस्तु
शक्तिमन्नं स्रुचं स्रुवं ॥ तोमरं व्यंजनं वामैर्घृत पात्रंच धारयन् ॥ २ ॥
मेषारूढो जटाबद्धो गौरवर्णो महौजसः ॥ धूमध्वजो लोहिताक्षः सप्तार्चिः
सर्व कामदः आत्माभिमुखमासीन एवं रूपो हुताशनः ॥ अग्निमूर्तीं ध्यात्वा ॥
इमꣳ स्तोमम ईत इत्यस्य कुत्सऋषिः अग्निर्देवता जगति छंदः अग्निपरी
समूहने विनियोगः इमꣳ स्तो ममर्हते जात वेदसे रथमिवसम्महे मामनीषया
॥ भद्राहिनः प्रमतिरस्यसꣳ सदग्ने सख्ये मारिषामावयंतव ॥ इति
हस्तेन दर्भ मय्या समुहिन्यावा ॥ अग्निं परितः परी समूह्य ॥

(3)

जलेन पर्युक्ष ॥ दर्भैः परिस्तीर्य पुरस्तात् दक्षिणतः ॥ पश्चात्
उत्तर पावकाग्नयेनमः ॥ गन्धं समर्पयामि ॥ पुष्पं धूपं दीपं नैवेद्यं
मंत्रपुष्पं एतैरूपचारैः संपूज्य पावकाग्नेयनमः इति नत्वा ॥
ॐ अग्नये स्वाहा ॥ अग्नय इदन्नमम ॥ सोमायस्वाहा ॥ सोमाय इदं
नमम ॥ धन्वन्तरयेस्वाहा धन्वन्तरस्य इदन्नमम ॥ प्रजापतयेस्वाहा ॥
प्रजापतय इदन्नमम ॥ अग्नये स्विष्टकृते स्वाहा ॥ अग्नये स्विष्टकृत
इदन्नमम ॥ प्रातर्वैश्वदेवार्थं पुनरेता एवाहुती हुत्वा ॥ ॐ भूः स्वाहा ॥
अग्नय इदं नमम ॥ ॐ भुवः स्वाहा वायव इदं नमम ॥ ॐ स्वः स्वाहा ॥

सुयाये दन्नमम॥ ॐ॥ भूर्भुवः स्वः स्वाहा॥ प्रजापतय इदन्नमम॥
आपो अद्यानिति ब्रम्हग्निरनुष्टुप् अग्न्युपस्थाने विनीयोगः आपो
अद्यानुचारिषꣳ रसेन समसृक्ष्महि॥ पयस्वा नग्न आगमं
तंमाꣳ सृजवर्चसा इत्युपस्थाय॥ त्र्यायुषं जमदग्नेः॥ इति ललाटे कश्य-
पस्य त्र्यायुषमिति कंठे॥ अगस्त्यस्य त्र्यायुषमिति नाभौ॥ यद्देवानांत्र्यायु-
त्र्यायुषमिति स्कंधयोः॥ तन्मे अस्तु त्र्यायुषमिति शिरसी॥ इति भस्मनांगा-
निसꣳस्पृश्य॥ आपोहिष्ठेति मार्जनं॥ कृत्वा॥ परिस्तरणा निउत्तरे
विसृजेत॥ अथ बलिदानं॥ अग्नेः पश्चाद्दिर्घंच चतुरस्रं गोमयेनजलेनवा

मंडलं कृत्वा॥ तत्र अग्नयेनमः सोमायनमः धन्वन्तरयेनमः विश्वेभ्यो
देवेभ्योनमः प्रजापतयेनमः अग्नये।स्विष्टकृते नमः इत्यागारसकाशे
मुत्तर मुत्तरं॥ अद्भ्योनमः इत्युदककुम्भ सकाशे॥ औषधीभ्योनमः
इत्यौषधिसकाशे॥ वनस्पतिभ्योनमः इति गृहमध्यमायां स्थूणायां
गृह गृहाभ्यो देवताभ्योनमः इतिगृहमध्ये॥ धर्मायनमः द्वार दक्षिण
भागे॥ अधर्मायनमः द्वारवामभागे। मृत्यवेनमः इति दक्षितः॥
आकाशायनमः इत्याकाशे॥ अंतर्गोष्ठायनमः इत्यंतर गोष्टे॥
बहिर्वैः श्रवणायनमः इतिबहिः॥ प्राचीं॥ विश्वेभ्यो देवेभ्योनमः

इति वेश्मनि॥ इन्द्रायनमः पुरुषेभ्योनमः इति पुरस्तात्॥ यमायनमः॥
यमपुरुषेभ्योनमः॥ इति दाक्षिणतः॥ वरुणायनमः॥ वरुणपुरुषेभ्यो-
नमः। इति पश्चात्। सोमायनमः॥ सोमपुरुषेभ्योनमः। इत्युत्तरतः॥
ब्रम्हणेनमः॥ ब्रम्ह पुरुषेभ्योनमः॥ इतिमध्ये। प्राचीं। अपातिकेभ्यो-
नमः संपातिकेभ्योनमः रक्षेभ्योनमः अप उप स्पृश्य। यक्षेभ्योनमः
पिपीलीकाभ्योनमः॥ पिशाचेभ्योनमः॥ अप्सरेभ्योनमः॥ गन्धर्वेभ्यो-
नमः॥ गुह्यकेभ्योनमः॥ शैलेभ्योनमः पन्नगेभ्योनमः॥ दिवाचारिभ्यो-
भूतेभ्योनमः इति नक्तं॥ धन्वन्तरयेनमः॥ धन्वन्तरीतर्पणयेनमः॥

(७)

इति प्रदक्षिण क्रमेण दद्यात्॥ शेषमन्नं चतुर्धा विभज्य। चतुर्दिक्षु
नमस्कारः॥ ये ब्राम्हणाः प्राच्यां दिशी॥ दक्षिणस्यां दिशी॥ प्रतीच्यां
दिशी॥ उत्तरस्यां दिशी ये देवाश्चैव ऋषयः यानिभुतानि तानिनः
स्वस्त्ययनं कुर्वंतु॥ कंठं कृत्वा॥ सनकादि योगीश्वरेभ्यः॥ कव्यवाडनला
दिसमस्त पितृभ्यः स्वधा॥ इदं अन्नं हतः॥ इति आग्नेय्यां॥
सव्यं॥ सुरभि वैष्णवीमाता नित्य विष्णु पदे स्थिता॥ गोग्रासं तु मया
दत्तं सुरभिः प्रतिगृह्यताम्॥ इत्युत्तरस्यां॥ अपसव्यं॥ ~~अद्भिः~~
अद्भिः सं सृज्य मम समस्त पितृभ्यः स्वधा॥ इति शेषमन्नं
दक्षिण भूमौ निनयेत्॥ अप उप स्पृश्य॥ यमो।सि यमदुतोसि

(८) वायसो।सिम हावलः अहोरात्रि कृतं पापं बलिं भक्षंतु वायसः॥
इति वायस बलिं हरेत्॥ हस्तौ पादौ प्रक्षाल्य॥ आचम्य॥ अतिथिं
भोजयित्वा॥ अवशिष्टं बंधुभिः सह भुंजीत॥ स्वस्ति श्रद्धां मेधां यशः
प्रज्ञां विद्यां बुद्धिं श्रियं बलं॥ आयुष्यं तेज आरोग्यं देहि मे
हव्यवाहन॥ हव्यवाहनायो म्नहति॥ कयानश्चित्रेति वामदेवऋषिः
विष्णु र्देवता गायत्री छंदः शांत्यर्थे जपे विनियोगः॥ कयान श्चित्र
आभुवदूतीस दावृधः सखा॥ कयाशचिष्ठ यावृता॥ कस्त्वा सत्योम-
दानाम् हिष्ठो मत्सदंधसः॥ दृढाचि दारुजे वसु॥ अभिषुणः
सखीनामविता जरि तृणां॥ शतं भवास्यूतिभिः॥ तन्नःश

(९) योरा वृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्ति र्मानुषेभ्यः
ऊर्ध्वं जिगातु भेषजं शन्नो अस्तु द्विपदे शंचतुष्पदे ॥ स्वस्तिन
इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ॥ स्वस्ति नस्तार्क्ष्यो
अरिष्टनेमि स्वस्ति नो बृहस्पतिर्दधातु ॥ स्वस्त्यस्तु ॥ चतुर्भिश्च-
चतुर्भिश्च द्वाभ्यां पंचभिरेवच ॥ हूयतेच पुनर्द्वाभ्यां तस्मै यज्ञा-
त्मनेनमः यस्य स्मृत्याच नाम्नोक्त्या तपो यज्ञ क्रियादिषु ॥ न्युनं
संपूर्णतां याति सद्यो वंदे तमच्युतं ॥२॥ प्रमादात् कुर्वतां कर्म
प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति
स्मृतिः ॥१॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर ॥

१०) यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशनः॥ २॥ इत्याग्निं विसृज्य॥
अनेन सायं प्रातर्वैश्वदेवाख्येन कर्मणा भगवान् अग्निरूपी
परमेश्वरः प्रीयतान्नमम ।